# ।। आर्यमञ्जुश्रीनामसंगीतिः ।।

# ।। संक्षिप्तमातृका ।।

|| āryamañjuśrīnāmasaṁgītiḥ ||

|| saṁkṣiptamātr̥kā ||

The Noble “Chanting the Names of Mañjuśrī”

Shorter version

सौगतम्

Saugatam

Sanskrit Buddhism

Edition and Introduction by:

Dharmavardhana Jñānagarbha (Mattia Salvini)

Published by Saugatam Sanskrit Buddhism

Current edition: May 2022

First edition: May 2022

This is a Dharma publication,

to be distributed freely, at no cost.

For more materials, please visit:

saugatam.org

**Table of contents** **page**


| | |
|---|---|
| Introduction | 1 |
| Text in Devanāgarī | 3 |
| Text in Roman script | 19 |
| Notes to the text | 35 |
| References | 37 |

## Introduction

।। ॐ नमः श्रीमहामञ्जुनाथाय ।।

The present text represents the shorter version of the Nāmasaṁgīti, matching what is normally recited in the Tibetan tradition (such as, for example, in the annual Nyingma Monlam); it does not contain the lengthy prose section and the chapter subdivisions that can be found in the longer version.

The Mañjuśrīnāmasaṁgīti is chanted daily in the Tibetan and in the Newar Buddhist traditions: the great scholar and yogin, Maitrīpa, advices practitioners to recite it three times daily. It has been commented upon from several different perspectives, and numerous Nāmasaṁgīti meditational practices exist to this day, including those of the most advanced type. Some masters point out that it can also be recited, more simply, as a praise of Mañjuśrī.

In the end notes to the text, readers may check where this version comes from, and why I choose certain readings. This is a revised edition when compared to previous editions available to me, and I have indicated the differences in the notes.

I thank Guru Vāgindraśīladhvaja for his costant guidance, Harunaga Isaacson for going through the text and offering several very useful corrections and suggestions, Prashant Varma for prompting me to put this text together to begin with, and Khyentse Foundation, for supporting Saugatam with a generous grant.

Sarvamaṅgalam!

Dharmavardhana Jñānagarbha

।। आर्यमञ्जुश्रीनामसंगीतिः ।। संक्षिप्तमातृका ।।

।। नमो मञ्जुश्रीकुमारभूताय ।।

अथ वज्रधरः श्रीमान् दुर्दान्तदमकः परः ।

त्रिलोकविजयी वीरो गुह्यराट् कुलिशेश्वरः ।। १ ।।

विबुद्धपुण्डरीकाक्षः प्रोत्फुल्लकमलाननः ।

प्रोल्लालयन् वज्रवरं स्वकरेण मुहुर्मुहुः ।। २ ।।

भृकुटीतरङ्गप्रमुखैरनन्तैर्वज्रपाणिभिः ।

दुर्दान्तदमकैर्वीरैर्वीरबीभत्सरूपिभिः ।। ३ ।।

उल्लालयद्भिः स्वकरैः प्रस्फुरद्वज्रकोटिभिः ।

प्रज्ञोपायमहाकरुणाजगदर्थकरैः परैः ।। ४ ।।

हृष्टतुष्टाशयैर्मुदितैः क्रोधविग्रहरूपिभिः ।

बुद्धकृत्यकरैर्नाथैः सार्धं प्रणतविग्रहैः ।। ५ ।।

प्रणम्य नाथं संबुद्धं भगवन्तं तथागतम् ।

कृताञ्जलिपुटो भूत्वा इदमाह स्थितो ऽग्रतः ।। ६ ।।

मद्धिताय ममार्थाय अनुकम्पाय मे विभो ।

मायाजालाभिसंबोधेर्यथा लाभी भवाम्यहम् ।। ७ ।।

अज्ञानपङ्कमग्नानां क्लेशव्याकुलचेतसाम् ।

हिताय सर्वसत्त्वानामनुत्तरफलाप्तये ।। ८ ।।

प्रकाशयतु संबुद्धो भगवाञ्शास्ता जगद्गुरुः।

महासमयतत्त्वज्ञ इन्द्रियाशयवित्परः।। ९।।

भगवज्ज्ञानकायस्य महोष्णीषस्य गीष्पतेः।

मञ्जुश्रीज्ञानसत्त्वस्य ज्ञानमूर्तेः स्वयंभुवः।। १०।।

गम्भीरार्थामुदारार्थां महार्थामसमां शिवाम्।

आदिमध्यान्तकल्याणीं नामसंगीतिमुत्तमाम्।। ११।।

यातीतैर्भाषिता बुद्धैर्भाषिष्यन्ते ह्यनागताः।

प्रत्युत्पन्नाश्च संबुद्धा यां भाषन्ते पुनः पुनः।। १२।।

मायाजालमहातन्त्रे या चास्मिन्सम्प्रगीयते।

महावज्रधरैर्हृष्टैरमेयैर्मन्त्रधारिभिः।। १३।।

अहं चैनां धारयिष्याम्या निर्याणाद्दृढाशयः।

यथा भवाम्यहं नाथ सर्वसंबुद्धगुह्यधृक्।। १४।।

प्रकाशयिष्ये सत्त्वानां यथाशयविशेषतः।

अशेषक्लेशनाशाय अशेषाज्ञानहानये।। १५।।

एवमध्येष्य गुह्येन्द्रो वज्रपाणिस्तथागतम्।

कृताञ्जलिपुटो भूत्वा प्रह्वकायः स्थितो ऽग्रतः।। १६।।

अथ शाक्यमुनिर्भगवान् संबुद्धो द्विपदोत्तमः।

निर्णमय्यायतां स्फीतां स्वजिह्वां स्वमुखाच्छुभाम्।। १७।।

स्मितं संदर्श्य लोकानामपायत्रयशोधनम्।

त्रैलोक्याभासकरणं चतुर्मारारिशासनम्।। १८।।

त्रिलोकमापूरयन्त्या ब्राह्म्या मधुरया गिरा।

प्रत्यभाषत गुह्येन्द्रं वज्रपाणिं महाबलम्।। १९।।

साधु वज्रधर श्रीमन् साधु ते वज्रपाणये।

यत्त्वं जगद्धितार्थाय महाकरुणयान्वितः।। २०।।

महार्थां नामसंगीतिं पवित्रामघनाशनीम्।

मञ्जुश्रीज्ञानकायस्य मत्तः श्रोतुं समुद्यतः।। २१।।

तत्साधु देशयाम्येष अहं ते गुह्यकाधिप।

शृणु त्वमेकाग्रमनास्तत्साधु भगवन्निति।। २२।।

अथ शाक्यमुनिर्भगवान् सकलं मन्त्रकुलं महत्।

मन्त्रविद्याधरकुलं व्यवलोक्य कुलत्रयम्।। २३।।

लोकलोकोत्तरकुलं लोकालोककुलं महत्।

महामुद्राकुलं चाग्र्यं महोष्णीषकुलं महत्।। २४।।

इमां षण्मन्त्रराजानसंयुक्तामद्वयोदयाम्।

अनुत्पादधर्मिणीं गाथां भाषते स्म गिरां पतेः।। २५।।

अ आ इ ई उ ऊ ए ऐ ओ औ अं अः स्थितो हृदि।

ज्ञानमूर्तिरहं बुद्धो बुद्धानां त्र्यध्ववर्तिनाम्।। २६।।

ॐ वज्रतीक्ष्णदुःखच्छेदप्रज्ञाज्ञानमूर्तये।

ज्ञानकायवागीश्वरारपचनाय ते नमः।। २७।।

तद्यथा भगवान् बुद्धः संबुद्धो ऽकारसंभवः।

अकारः सर्ववर्णाग्र्यो महार्थः परमाक्षरः।। २८।।

महाप्राणो ह्यनुत्पादो वागुदाहारवर्जितः।

सर्वाभिलापहेत्वग्र्यः सर्ववाक्सुप्रभास्वरः।। २९।।

महामहमहारागः सर्वसत्त्वरतिंकरः।

महामहमहाद्वेषः सर्वक्लेशमहारिपुः।। ३०।।

महामहमहामोहो मूढधीमोहसूदनः ।

महामहमहाक्रोधो महाक्रोधरिपुर्महान् ।। ३१ ।।

महामहमहालोभः सर्वलोभनिषूदनः ।

महाकामो महासौख्यो महामोदो महारतिः ।। ३२ ।।

महारूपो महाकायो महावर्णो महावपुः ।

महानामा महोदारो महाविपुलमण्डलः ।। ३३ ।।

महाप्रज्ञायुधधरो महाक्लेशाङ्कुशो ऽग्रणीः ।

महायशा महाकीर्तिर्महाज्योतिर्महाद्युतिः ।। ३४ ।।

महामायाधरो विद्वान् महामायार्थसाधकः ।

महामायारतिरतो महामायेन्द्रजालिकः ।। ३५ ।।

महादानपतिः श्रेष्ठो महाशीलधरो ऽग्रणीः ।

महाक्षान्तिधरो धीरो महावीर्यपराक्रमः ।। ३६ ।।

महाध्यानसमाधिस्थो महाप्रज्ञाशरीरधृक् ।

महाबलो महोपायः प्रणिधिर्ज्ञानसागरः ।। ३७ ।।

महामैत्रीमयो ऽमेयो महाकारुणिको ऽग्रधीः ।

महाप्राज्ञो महाधीमान् महोपायो महाकृती ।। ३८ ।।

महाऋद्धिबलोपेतो महावेगो महाजवः ।

महर्द्धिको महेशाख्यो महाबलपराक्रमः ।। ३९ ।।

महाभवाद्रिसंभेत्ता महावज्रधरो घनः ।

महाक्रूरो महारौद्रो महाभयभयंकरः ।। ४० ।।

महाविद्योत्तमो नाथो महामन्त्रोत्तमो गुरुः ।

महायाननयारूढो महायाननयोत्तमः ।। ४१ ।।

महावैरोचनो बुद्धो महामौनी महामुनिः ।

महामन्त्रनयोद्भूतो महामन्त्रनयात्मकः ।। ४२ ।।

दशपारमिताप्राप्तो दशपारमिताश्रयः ।

दशपारमिताशुद्धिर्दशपारमितानयः ।। ४३ ।।

दशभूमीश्वरो नाथो दशभूमिप्रतिष्ठितः ।

दशज्ञानविशुद्धात्मा दशज्ञानविशुद्धधृक् ।। ४४ ।।

दशाकारो दशार्थार्थो मुनीन्द्रो दशबलो विभुः ।

अशेषविश्वार्थकरो दशाकारवशी महान् ।। ४५ ।।

अनादिर्निष्प्रपञ्चात्मा शुद्धात्मा तथतात्मकः ।

भूतवादी यथावादी तथाकारी अनन्यवाक् ।। ४६ ।।

अद्वयो ऽद्वयवादी च भूतकोटिव्यवस्थितः ।

नैरात्म्यसिंहनिर्नादी कुतीर्थ्यमृगभीकरः ।। ४७ ।।

सर्वत्रगो ऽमोघगतिस्तथागतमनोजवः ।

जिनो जितारिर्विजयी चक्रवर्ती महाबलः ।। ४८ ।।

गणमुख्यो गणाचार्यो गणेशो गणपतिर्वशी ।

महानुभावो धौरेयो ऽनन्यनेयो महानयः ।। ४९ ।।

वागीशो वाक्पतिर्वाग्मी वाचस्पतिरनन्तगीः ।

सत्यवाक्सत्यवादी च चतुःसत्योपदेशकः ।। ५० ।।

अवैवर्तिको ह्यनागामी खड्गः प्रत्येकनायकः ।

नानानिर्याणनिर्यातो महाभूतैककारणः ।। ५१ ।।

अर्हन् क्षीणास्रवो भिक्षुर्वीतरागो जितेन्द्रियः ।

क्षेमप्राप्तो ऽभयप्राप्तः शीतीभूतो ह्यनाविलः ।। ५२ ।।

विद्याचरणसंपन्नः सुगतो लोकवित्परः ।

निर्ममो निरहंकारः सत्यद्वयनयस्थितः ।। ५३ ।।

संसारपारकोटिस्थः कृतकृत्यः स्थले स्थितः ।

कैवल्यज्ञाननिष्ठ्यूतः प्रज्ञाशस्त्रो विदारणः ।। ५४ ।।

सद्धर्मो धर्मराड् भास्वान् लोकालोककरः परः ।

धर्मेश्वरो धर्मराजः श्रेयोमार्गोपदेशकः ।। ५५ ।।

सिद्धार्थः सिद्धसङ्कल्पः सर्वसङ्कल्पवर्जितः ।

निर्विकल्पो ऽक्षयो धातुर्धर्मधातुः परो ऽव्ययः ।। ५६ ।।

पुण्यवान् पुण्यसंभारो ज्ञानं ज्ञानाकरं महत् ।

ज्ञानवान् सदसज्ज्ञानी संभारद्वयसंभृतः ।। ५७ ।।

शाश्वतो विश्वराड् योगी ध्यानं ध्येयो धियां पतिः ।

प्रत्यात्मवेद्यो ह्यचलः परमाद्यस्त्रिकायधृक् ।। ५८ ।।

पञ्चकायात्मको बुद्धः पञ्चज्ञानात्मको विभुः ।

पञ्चबुद्धात्ममुकुटः पञ्चचक्षुरसङ्गधृक् ।। ५९ ।।

जनकः सर्वबुद्धानां बुद्धपुत्रः परो वरः ।

प्रज्ञाभवोद्भवो योनिर्धर्मयोनिर्भवान्तकृत् ।। ६० ।।

घनैकसारो वज्रात्मा सद्योजातो जगत्पतिः ।

गगनोद्भवः स्वयम्भूः प्रज्ञाज्ञानानलो महान् ।। ६१ ।।

वैरोचनो महादीप्तिर्ज्ञानज्योतिर्विरोचनः ।

जगत्प्रदीपो ज्ञानोल्को महातेजाः प्रभास्वरः ।। ६२ ।।

विद्याराजो ऽग्रमन्त्रेशो मन्त्रराजो महार्थकृत् ।

महोष्णीषो ऽद्भुतोष्णीषो विश्वदर्शी वियत्पतिः ।। ६३ ।।

सर्वबुद्धात्मभावाग्र्यो जगदानन्दलोचनः।

विश्वरूपी विधाता च पूज्यो मान्यो महाऋषिः।। ६४।।

कुलत्रयधरो मन्त्री महासमयमन्त्रधृक्।

रत्नत्रयधरः श्रेष्ठस्त्रियानोत्तमदेशकः।। ६५।।

अमोघपाशो विजयी वज्रपाशो महाग्रहः।

वज्राङ्कुशो महापाशो वज्रभैरवभीकरः।। ६६।।

क्रोधराट् षण्मुखो भीमः षण्नेत्रः षड्भुजो बली।

दंष्ट्राकरालः कङ्कालो हलाहलः शताननः।। ६७।।

यमान्तको विघ्नराजो वज्रवेगो भयङ्करः।

विघुष्टवज्रो हृद्वज्रो मायावज्रो महोदरः।। ६८।।

कुलिशेशो वज्रयोनिर्वज्रमण्डो नभोपमः।

अचलैकजटाटोपो गजचर्मपटार्द्रधृक्।। ६९।।

हाहाकारो महाघोरो हीहीकारो भयानकः।

अट्टहासो महाहासो वज्रहासो महारवः।। ७०।।

वज्रसत्त्वो महासत्त्वो वज्रराजो महासुखः।

वज्रचण्डो महामोदो वज्रहूंकारहूंकृतिः।। ७१।।

वज्रबाणायुधधरो वज्रखड्गो निकृन्तनः।

विश्ववज्रधरो वज्री एकवज्री रणञ्जहः।। ७२।।

वज्रज्वालाकरालाक्षो वज्रज्वालाशिरोरुहः।

वज्रावेशो महावेशः शताक्षो वज्रलोचनः।। ७३।।

वज्ररोमाङ्कुरतनुर्वज्ररोमैकविग्रहः।

वज्रकोटिनखारम्भो वज्रसारघनच्छविः।। ७४।।

वज्रमालाधरः श्रीमान् वज्राभरणभूषितः ।

हाहाट्टहासो निर्घोषो वज्रघोषः षडक्षरः ।। ७५ ।।

मञ्जुघोषो महानादस्त्रैलोक्यैकरवो महान् ।

आकाशधातुपर्यन्तघोषो घोषवतां वरः ।। ७६ ।।

तथताभूतनैरात्म्यभूतकोटिरनक्षरः ।

शून्यतावादिवृषभो गम्भीरोदारगर्जनः ।। ७७ ।।

धर्मशङ्खो महाशब्दो धर्मगण्डी महारणः ।

अप्रतिष्ठितनिर्वाणो दशदिग्धर्मदुन्दुभिः ।। ७८ ।।

अरूपो रूपवान् अग्र्यो नानारूपो मनोमयः ।

सर्वरूपावभासश्रीरशेषप्रतिबिम्बधृक् ।। ७९ ।।

अप्रधृष्यो महेशाख्यस्त्रैधातुकमहेश्वरः ।

समुच्छ्रितार्यमार्गस्थो धर्मकेतुर्महोदयः ।। ८० ।।

त्रैलोक्यैककुमाराङ्गः स्थविरो वृद्धः प्रजापतिः ।

द्वात्रिंशल्लक्षणधरः कान्तस्त्रैलोक्यसुन्दरः ।। ८१ ।।

लोकज्ञानगुणाचार्यो लोकाचार्यो विशारदः ।

नाथस्त्राता त्रिलोकाप्तः शरणं ताय्यनुत्तरः ।। ८२ ।।

गगनाभोगसंभोगः सर्वज्ञज्ञानसागरः ।

अविद्याण्डकोशसंभेत्ता भवपञ्जरदारणः ।। ८३ ।।

शमिताशेषसंक्लेशः संसारार्णवपारगः ।

ज्ञानाभिषेकमुकुटः सम्यक्संबुद्धभूषणः ।। ८४ ।।

त्रिदुःखदुःखशमनस्त्र्यन्तो ऽनन्तस्त्रिमुक्तिगः ।

सर्वावरणनिर्मुक्त आकाशसमतां गतः ।। ८५ ।।

सर्वक्लेशमलातीतस्त्र्यध्वानध्वगतिं गतः।

सर्वसत्त्वमहानागो गुणशेखरशेखरः।। ८६।।

सर्वोपधिविनिर्मुक्तो व्योमवर्त्मनि सुस्थितः।

महाचिन्तामणिधरः सर्वरत्नोत्तमो विभुः।। ८७।।

महाकल्पतरुः स्फीतो महाभद्रघटोत्तमः।

सर्वसत्त्वार्थकृत्कर्ता हितैषी सत्त्ववत्सलः।। ८८।।

शुभाशुभज्ञः कालज्ञः समयज्ञः समयी विभुः।

सत्त्वेन्द्रियज्ञो वेलज्ञो विमुक्तित्रयकोविदः।। ८९।।

गुणी गुणज्ञो धर्मज्ञः प्रशस्तो मङ्गलोदयः।

सर्वमङ्गलमाङ्गल्यः कीर्तिर्लक्ष्मीर्यशः शुभः।। ९०।।

महोत्सवो महाश्वासो महानन्दो महारतिः।

सत्कारः सत्कृतिर्भूतिः प्रमोदः श्रीर्यशस्पतिः।। ९१।।

वरेण्यो वरदः श्रेष्ठः शरण्यः शरणोत्तमः।

महाभयारिः प्रवरो निःशेषभयनाशनः।। ९२।।

शिखी शिखण्डी जटिलो जटी मौण्डी किरीटिमान्।

पञ्चाननः पञ्चशिखः पञ्चचीरकशेखरः।। ९३।।

महाव्रतधरो मौञ्जी ब्रह्मचारी व्रतोत्तमः।

महातपास्तपोनिष्ठः स्नातको गौतमो ऽग्रणीः।। ९४।।

ब्रह्मविद्ब्राह्मणो ब्रह्मा ब्रह्मनिर्वाणमाप्तवान्।

मुक्तिर्मोक्षो विमोक्षाङ्गो विमुक्तिः शान्तता शिवः।। ९५।।

निर्वाणं निर्वृतिः शान्तिः श्रेयो निर्याणमन्तगः।

सुखदुःखान्तकृन्निष्ठा वैराग्यमुपधिक्षयः।। ९६।।

अजयो ऽनुपमो ऽव्यक्तो निराभासो निरञ्जनः ।

निष्कलः सर्वगो व्यापी सूक्ष्मो ऽबीजमनास्रवः ।। ९७ ।।

अरजो विरजो विमलो वान्तदोषो निरामयः ।

सुप्रबुद्धो विबुद्धात्मा सर्वज्ञः सर्ववित्परः ।। ९८ ।।

विज्ञानधर्मतातीतो ज्ञानमद्वयरूपधृक् ।

निर्विकल्पो निराभोगस्त्र्यध्वसंबुद्धकार्यकृत् ।। ९९ ।।

अनादिनिधनो बुद्ध आदिबुद्धो निरन्वयः ।

ज्ञानैकचक्षुरमलो ज्ञानमूर्तिस्तथागतः ।। १०० ।।

वागीश्वरो महावादी वादिराड् वादिपुङ्गवः ।

वदतां वरो वरिष्ठो वादिसिंहो ऽपराजितः ।। १०१ ।।

समन्तदर्शी प्रामोद्यस्तेजोमाली सुदर्शनः ।

श्रीवत्सः सुप्रभो दीप्तिर्भाभासुरकरद्युतिः ।। १०२ ।।

महाभिषग्वरः श्रेष्ठः शल्यहर्ता निरुत्तरः ।

अशेषभैषज्यतरुः क्लेशव्याधिमहारिपुः ।। १०३ ।।

त्रैलोक्यतिलकः कान्तः श्रीमान्नक्षत्रमण्डलः ।

दशदिग्व्योमपर्यन्तो धर्मध्वजमहोच्छ्रयः ।। १०४ ।।

जगच्छत्रैकविपुलो मैत्रीकरुणमण्डलः ।

पद्मनर्तेश्वरः श्रीमान् रत्नच्छत्रो महाविभुः ।। १०५ ।।

सर्वबुद्धमहाराजः सर्वबुद्धात्मभावधृक् ।

सर्वबुद्धमहायोगः सर्वबुद्धैकशासनः ।। १०६ ।।

वज्ररत्नाभिषेकश्रीः सर्वरत्नाधिपेश्वरः ।

सर्वलोकेश्वरपतिः सर्ववज्रधराधिपः ।। १०७ ।।

सर्वबुद्धमहाचित्तः सर्वबुद्धमनोगतिः।

सर्वबुद्धमहाकायः सर्वबुद्धसरस्वती।। १०८।।

वज्रसूर्यमहालोको वज्रेन्दुविमलप्रभः।

विरागादिमहारागो विश्ववर्णोज्ज्वलप्रभः।। १०९।।

सम्बुद्धवज्रपर्यङ्को बुद्धसंगीतिधर्मधृक्।

बुद्धपद्मोद्भवः श्रीमान् सर्वज्ञज्ञानकोषधृक्।। ११०।।

विश्वमायाधरो राजा बुद्धविद्याधरो महान्।

वज्रतीक्ष्णो महाखड्गो विशुद्धः परमाक्षरः।। १११।।

दुःखच्छेदमहायानो वज्रधर्ममहायुधः।

जिनजिग्वज्रगाम्भीर्यो वज्रबुद्धिर्यथार्थवित्।। ११२।।

सर्वपारमितापूरी सर्वभूमिविभूषणः।

विशुद्धधर्मनैरात्म्यः सम्यग्ज्ञानेन्दुहृत्प्रभः।। ११३।।

मायाजालमहोद्योगः सर्वतन्त्राधिपः परः।

अशेषवज्रपर्यङ्को निःशेषज्ञानकायधृक्।। ११४।।

समन्तभद्रः सुमतिः क्षितिगर्भो जगद्धृतिः।

सर्वबुद्धमहागर्भो विश्वनिर्माणचक्रधृक्।। ११५।।

सर्वभावस्वभावाग्र्यः सर्वभावस्वभावधृक्।

अनुत्पादधर्मा विश्वार्थः सर्वधर्मस्वभावधृक्।। ११६।।

एकक्षणमहाप्राज्ञः सर्वधर्मावबोधधृक्।

सर्वधर्माभिसमयो भूतान्तमुनिरग्रधीः।। ११७।।

स्तिमितः सुप्रसन्नात्मा सम्यक्संबुद्धबोधिधृक्।

प्रत्यक्षः सर्वबुद्धानां ज्ञानार्चिः सुप्रभास्वरः।। ११८।।

इष्टार्थसाधकः परः सर्वापायविशोधकः।

सर्वसत्त्वोत्तमो नाथः सर्वसत्त्वप्रमोचकः।। ११९।।

क्लेशसंग्रामशूरैकः अज्ञानरिपुदर्पहा।

धीश्रृङ्गारधरः श्रीमान् वीरबीभत्सरूपधृक्।। १२०।।

बाहुदण्डशताक्षेपपदनिक्षेपनर्त्तनः।

श्रीमच्छतभुजाभोगगगनाभोगनर्त्तनः।। १२१।।

एकपादतलाक्रान्तमहीमण्डतले स्थितः।

ब्रह्माण्डशिखराक्रान्तपादाङ्गुष्ठनखे स्थितः।। १२२।।

एकार्थो ऽद्वयधर्मार्थः परमार्थो ऽविनश्वरः।

नानाविज्ञप्तिरूपार्थश्चित्तविज्ञानसन्ततिः।। १२३।।

अशेषभावार्थरतिः शून्यतारतिरग्रधीः।

भवरागाद्यतीतश्च भवत्रयमहारतिः।। १२४।।

शुद्धशुभ्राभ्रधवलः शरच्चन्द्रांशुसुप्रभः।

बालार्कमण्डलच्छायो महारागनखप्रभः।। १२५।।

इन्द्रनीलाग्रसच्चीरो महानीलकचाग्रधृक्।

महामणिमयूखश्रीर्बुद्धनिर्माणभूषणः।। १२६।।

लोकधातुशताकम्पी ऋद्धिपादमहाक्रमः।

महास्मृतिधरस्तत्त्वश्चतुःस्मृतिसमाधिराट्।। १२७।।

बोध्यङ्गकुसुमामोदस्तथागतगुणोदधिः।

अष्टाङ्गमार्गनयवित् सम्यक्संबुद्धमार्गवित्।। १२८।।

सर्वसत्त्वमहासङ्गो निःसङ्गो गगनोपमः।

सर्वसत्त्वमनोजातः सर्वसत्त्वमनोजवः।। १२९।।

सर्वसत्त्वेन्द्रियार्थज्ञः सर्वसत्त्वमनोहरः ।

पञ्चस्कन्धार्थतत्त्वज्ञः पञ्चस्कन्धविशुद्धधृक् ।। १३० ।।

सर्वनिर्याणकोटिस्थः सर्वनिर्याणकोविदः ।

सर्वनिर्याणमार्गस्थः सर्वनिर्याणदेशकः ।। १३१ ।।

द्वादशाङ्गभवोत्खातो द्वादशाकारशुद्धधृक् ।

चतुःसत्यनयाकारः अष्टज्ञानावबोधधृक् ।। १३२ ।।

द्वादशाकारसत्यार्थः षोडशाकारतत्त्ववित् ।

विंशत्याकारसंबोधिर्विबुद्धः सर्ववित्परः ।। १३३ ।।

अमेयबुद्धनिर्माणकायकोटिविभावकः ।

सर्वक्षणाभिसमयः सर्वचित्तक्षणार्थवित् ।। १३४ ।।

नानायाननयोपायजगदर्थविभावकः ।

यानत्रितयनिर्यात एकयानफले स्थितः ।। १३५ ।।

क्लेशधातुविशुद्धात्मा कर्मधातुक्षयङ्करः ।

ओघोदधिसमुत्तीर्णो योगकान्तारनिःसृतः ।। १३६ ।।

क्लेशोपक्लेशसंक्लेशसुप्रहीणसवासनः ।

प्रज्ञोपायमहाकरुणाअमोघजगदर्थकृत् ।। १३७ ।।

सर्वसंज्ञाप्रहीणार्थो विज्ञानार्थो निरोधधृक् ।

सर्वसत्त्वमनोविषयः सर्वसत्त्वमनोगतिः ।। १३८ ।।

सर्वसत्त्वमनोन्तस्थस्तच्चित्तसमताङ्गतः ।

सर्वसत्त्वमनोह्लादी सर्वसत्त्वमनोरतिः ।। १३९ ।।

सिद्धान्तो विभ्रमापेतः सर्वभ्रान्तिविवर्जितः ।

निःसन्दिग्धमतिस्त्र्यर्थः सर्वार्थस्त्रिगुणात्मकः ।। १४० ।।

पञ्चस्कन्धार्थस्त्रिकालः सर्वक्षणविभावकः।

एकक्षणाभिसम्बुद्धः सर्वबुद्धस्वभावधृक्।। १४१।।

अनङ्गकायः कायाग्र्यः कायकोटिविभावकः।

अशेषरूपसंदर्शी रत्नकेतुर्महामणिः।। १४२।।

सर्वसंबुद्धबोद्धव्यो बुद्धबोधिरनुत्तरः।

अनक्षरो मन्त्रयोनिर्महामन्त्रकुलत्रयः।। १४३।।

सर्वमन्त्रार्थजनको महाबिन्दुरनक्षरः।

पञ्चाक्षरो महाशून्यो बिन्दुशून्यः शताक्षरः।। १४४।।

सर्वाकारो निराकारः षोडशार्धार्धबिन्दुधृक्।

अकलः कलनातीतश्चतुर्थध्यानकोटिधृक्।। १४५।।

सर्वध्यानकलाभिज्ञः समाधिकुलगोत्रवित्।

समाधिकायः कायाग्र्यः सर्वसंभोगकायराट्।। १४६।।

निर्माणकायः कायाग्र्यो बुद्धनिर्माणवंशधृक्।

दशदिग्विश्वनिर्माणो यथावज्जगदर्थकृत्।। १४७।।

देवातिदेवो देवेन्द्रः सुरेन्द्रो दानवाधिपः।

अमरेन्द्रः सुरगुरुः प्रमथः प्रमथेश्वरः।। १४८।।

उत्तीर्णभवकान्तार एकः शास्ता जगद्गुरुः।

प्रख्यातदशदिग्लोको धर्मदानपतिर्महान्।। १४९।।

मैत्रीसन्नाहसन्नद्धः करुणावर्मवर्मितः।

प्रज्ञाखड्गो धनुर्बाणः क्लेशाज्ञानरणंजहः।। १५०।।

मारारिर्मारजिद्वीरश्चतुर्मारभयान्तकृत्।

सर्वमारचमूजेता संबुद्धो लोकनायकः।। १५१।।

वन्द्यः पूज्यो ऽभिवाद्यश्च माननीयश्च नित्यशः।

अर्चनीयतमो मान्यो नमस्यः परमो गुरुः।। १५२।।

त्रैलोक्यैकक्रमगतिर्व्योमपर्यन्तविक्रमः।

त्रैविद्यः श्रोत्रियः पूतः षडभिज्ञः षडनुस्मृतिः।। १५३।।

बोधिसत्त्वो महासत्त्वो लोकातीतो महर्द्धिकः।

प्रज्ञापारमितानिष्ठः प्रज्ञातत्त्वत्वमागतः।। १५४।।

आत्मवित्परवित्सर्वः सर्वीयो ह्यग्रपुद्गलः।

सर्वोपमामतिक्रान्तो ज्ञेयो ज्ञानाधिपः परः।। १५५।।

धर्मदानपतिः श्रेष्ठश्चतुर्मुद्रार्थदेशकः।

पर्युपास्यतमो जगतां निर्याणत्रययायिनाम्।। १५६।।

परमार्थविशुद्धश्रीस्त्रैलोक्यसुभगो महान्।

सर्वसम्पत्करः श्रीमान् मञ्जुश्रीः श्रीमतां वरः।। १५७।।

नमस्ते वरदवज्राग्र्य भूतकोटे नमो ऽस्तु ते।

नमस्ते शून्यतागर्भ बुद्धबोधे नमो ऽस्तु ते।। १५८।।

बुद्धराग नमस्ते ऽस्तु बुद्धकाम नमो नमः।

बुद्धप्रीते नमस्तुभ्यं बुद्धमोद नमो नमः।। १५९।।

बुद्धस्मित नमस्तुभ्यं बुद्धहास नमो नमः।

बुद्धवाच नमस्तुभ्यं बुद्धभाव नमो नमः।। १६०।।

अभवोद्भव नमस्तुभ्यं नमस्ते बुद्धसंभव।

गगनोद्भव नमस्तुभ्यं नमस्ते ज्ञानसंभव।। १६१।।

मायाजाल नमस्तुभ्यं नमस्ते बुद्धनाटक।

नमस्ते सर्वसर्वेभ्यो ज्ञानकाय नमो ऽस्तु ते।। १६२।।

ओं सर्वधर्माभावस्वभावविशुद्धवज्र अ आ अं अः।

प्रकृतिपरिशुद्धाः सर्वधर्मा यदुत

सर्वतथागतज्ञानकायमञ्जुश्रीपरिशुद्धितामुपादायेति

अ आः सर्वतथागतहृदय हर हर। ओं हूं ह्रीः

भगवज्ज्ञानमूर्तिवागीश्वर महावाच सर्वधर्मगगनामलसुपरिशुद्धधर्मधातुज्ञानगर्भ आः।

अथ वज्रधरः श्रीमान् हृष्टतुष्टः कृताञ्जलिः।

प्रणम्य नाथं संबुद्धं भगवन्तं तथागतम्।। १६३।।

अन्यैश्च बहुभिर्नाथैर्गुह्येन्द्रैर्वज्रपाणिभिः।

स सार्धं क्रोधराजानैः प्रोवाचोच्चैरिदं वचः।। १६४।।

अनुमोदामहे नाथ साधु साधु सुभाषितम्।

कृतो ऽस्माकं महान् अर्थः सम्यक्संबोधिप्रापकः।। १६५।।

जगतश्चाप्यनाथस्य विमुक्तिफलकाङ्क्षिणः।

श्रेयोमार्गो विशुद्धो ऽयं मायाजालनयोदितः।। १६६।।

गम्भीरोदारवैपुल्यो महार्थो जगदर्थकृत्।

बुद्धानां विषयो ह्येष सम्यक्संबुद्धभाषितः।। १६७।।

इत्यार्यमायाजालात् षोडशसाहस्रिकान्महायोगतन्त्रान्तःपातिसमाधिजालपटलाद् भगवत्तथागतशाक्यमुनिभाषिता भगवतो मञ्जुश्रीज्ञानसत्त्वस्य परमार्था नामसंगीतिः परिसमाप्ता।।

|| āryamañjuśrīnāmasaṁgītiḥ || saṁkṣiptamātr̥kā ||

|| namo mañjuśrīkumārabhūtāya ||

atha vajradharaḥ śrīmān durdāntadamakaḥ paraḥ |

trilokavijayī vīro guhyarāṭ kuliśeśvaraḥ || 1 ||

vibuddhapuṇḍarīkākṣaḥ protphullakamalānanaḥ |

prollālayan vajravaraṁ svakareṇa muhur muhuḥ || 2

bhr̥kuṭītaraṅgapramukhair anantair vajrapāṇibhiḥ |

durdāntadamakair vīrair vīrabībhatsarūpibhiḥ || 3 ||

ullālayadbhiḥ svakaraiḥ prasphuradvajrakoṭibhiḥ |
prajñopāyamahākaruṇājagadarthakaraiḥ paraiḥ || 4 ||

hr̥ṣṭatuṣṭāśayair muditaiḥ krodhavigraharūpibhiḥ |

buddhakr̥tyakarair nāthaiḥ sārdhaṁ praṇatavigrahaiḥ || 5 ||

praṇamya nāthaṁ saṁbuddhaṁ bhagavantaṁ tathāgatam |

kr̥tāñjalipuṭo bhūtvā idam āha sthito 'grataḥ || 6 ||

maddhitāya mamārthāya anukampāya me vibho |

māyājālābhisaṁbodher yathā lābhī bhavāmy aham || 7 ||

ajñānapaṅkamagnānāṁ kleśavyākulacetasām |

hitāya sarvasattvānām anuttaraphalāptaye || 8 ||

prakāśayatu saṁbuddho bhagavāñ śāstā jagadguruḥ |

mahāsamayatattvajña indriyāśayavit paraḥ || 9 ||

bhagavañ jñānakāyasya mahoṣṇīṣasya gīṣpateḥ |

mañjuśrījñānasattvasya jñānamūrteḥ svayaṁbhuvaḥ || 10 ||

gambhīrārthām udārārthāṁ mahārthām asamāṁ śivām |

ādimadhyāntakalyāṇīṁ nāmasaṁgītim uttamām || 11 ||

yātītair bhāṣitā buddhair bhāṣiṣyante hy anāgatāḥ |

pratyutpannāś ca saṁbuddhā yāṁ bhāṣante punaḥ punaḥ || 12 ||

māyājālamahātantre yā cāsmin sampragīyate |

mahāvajradharair hr̥ṣṭair ameyair mantradhāribhiḥ || 13 ||

ahaṁ caināṁ dhārayiṣyāmy ā niryāṇād dr̥ḍhāśayaḥ |

yathā bhavāmy ahaṁ nātha sarvasaṁbuddhaguhyadhr̥k || 14 ||

prakāśayiṣye sattvānāṁ yathāśayaviśeṣataḥ |

aśeṣakleśanāśāya aśeṣājñānahānaye || 15 ||

evam adhyeṣya guhyendro vajrapāṇis tathāgatam |

kr̥tāñjalipuṭo bhūtvā prahvakāyaḥ sthito 'grataḥ || 16 ||

atha śākyamunir bhagavān saṁbuddho dvipadottamaḥ |

nirṇamayyāyatāṁ sphītāṁ svajihvāṁ svamukhāc chubhām || 17 ||

smitaṁ saṁdarśya lokānām apāyatrayaśodhanam |

trailokyābhāsakaraṇaṁ caturmārāriśāsanam || 18 ||

trilokam āpūrayantyā brāhmyā madhurayā girā |

pratyabhāṣata guhyendraṁ vajrapāṇiṁ mahābalam || 19 ||

sādhu vajradhara śrīman sādhu te vajrapāṇaye |

yat tvaṁ jagaddhitārthāya mahākaruṇayānvitaḥ || 20 ||

mahārthāṁ nāmasaṁgītiṁ pavitrām aghanāśanīm |

mañjuśrījñānakāyasya mattaḥ śrotuṁ samudyataḥ || 21 ||

tat sādhu deśayāmy eṣa ahaṁ te guhyakādhipa |

śr̥ṇu tvam ekāgramanās tat sādhu bhagavann iti || 22 ||

atha śākyamunir bhagavān sakalaṁ mantrakulaṁ mahat |

mantravidyādharakulaṁ vyavalokya kulatrayam || 23 ||

lokalokottarakulaṁ lokālokakulaṁ mahat |

mahāmudrākulaṁ cāgryaṁ mahoṣṇīṣakulaṁ mahat || 24 ||

imāṁ ṣaṇmantrarājānasaṁyuktām advayodayām |

anutpādadharmiṇīṁ gāthāṁ bhāṣate sma girāṁ pateḥ || 25 ||

a ā i ī u ū e ai o au aṁ aḥ sthito hṛdi |

jñānamūrtir ahaṁ buddho buddhānāṁ tryadhvavartinām || 26 ||

oṁ vajratīkṣṇaduḥkhacchedaprajñājñānamūrtaye |

jñānakāyavāgīśvarārapacanāya te namaḥ || 27 ||

tadyathā bhagavān buddhaḥ saṁbuddho 'kārasaṁbhavaḥ |

akāraḥ sarvavarṇāgryo mahārthaḥ paramākṣaraḥ || 28 ||

mahāprāṇo hy anutpādo vāgudāhāravarjitaḥ |

sarvābhilāpahetvagryaḥ sarvavāksuprabhāsvaraḥ || 29 ||

mahāmahamahārāgaḥ sarvasattvaratiṁkaraḥ |

mahāmahamahādveṣaḥ sarvakleśamahāripuḥ || 30 ||

mahāmahamahāmoho mūḍhadhīmohasūdanaḥ |

mahāmahamahākrodho mahākrodharipur mahān || 31 ||

mahāmahamahālobhaḥ sarvalobhaniṣūdanaḥ |

mahākāmo mahāsaukhyo mahāmodo mahāratiḥ || 32 ||

mahārūpo mahākāyo mahāvarṇo mahāvapuḥ |

mahānāmā mahodāro mahāvipulamaṇḍalaḥ || 33 ||

mahāprajñāyudhadharo mahākleśāṅkuśo 'graṇīḥ |

mahāyaśā mahākīrtir mahājyotir mahādyutiḥ || 34 ||

mahāmāyādharo vidvān mahāmāyārthasādhakaḥ |

mahāmāyāratirato mahāmāyendrajālikaḥ || 35 ||

mahādānapatiḥ śreṣṭho mahāśīladharo 'graṇīḥ |

mahākṣāntidharo dhīro mahāvīryaparākramaḥ || 36 ||

mahādhyānasamādhistho mahāprajñāśarīradhṛk |

mahābalo mahopāyaḥ praṇidhir jñānasāgaraḥ || 37 ||

mahāmaitrīmayo 'meyo mahākāruṇiko 'gradhīḥ |

mahāprājño mahādhīmān mahopāyo mahākṛtī || 38 ||

mahārddhibalopeto mahāvego mahājavaḥ |

maharddhiko maheśākhyo mahābalaparākramaḥ || 39 ||

mahābhavādrisaṁbhettā mahāvajradharo ghanaḥ |

mahākrūro mahāraudro mahābhayabhayaṁkaraḥ || 40 ||

mahāvidyottamo nātho mahāmantrottamo guruḥ |

mahāyānanayārūḍho mahāyānanayottamaḥ || 41 ||

mahāvairocano buddho mahāmaunī mahāmuniḥ |

mahāmantranayodbhūto mahāmantranayātmakaḥ || 42 ||

daśapāramitāprāpto daśapāramitāśrayaḥ |

daśapāramitāśuddhir daśapāramitānayaḥ || 43 ||

daśabhūmīśvaro nātho daśabhūmipratiṣṭhitaḥ |

daśajñānaviśuddhātmā daśajñānaviśuddhadhṛk || 44 ||

daśākāro daśārthārtho munīndro daśabalo vibhuḥ |

aśeṣaviśvārthakaro daśākāravaśī mahān || 45 ||

anādir niṣprapañcātmā śuddhātmā tathatātmakaḥ |

bhūtavādī yathāvādī tathākārī ananyavāk || 46 ||

advayo 'dvayavādī ca bhūtakoṭivyavasthitaḥ |

nairātmyasiṁhanirnādī kutīrthyamṛgabhīkaraḥ || 47 ||

sarvatrago 'moghagatis tathāgatamanojavaḥ |

jino jitārir vijayī cakravartī mahābalaḥ || 48 ||

gaṇamukhyo gaṇācāryo gaṇeśo gaṇapatir vaśī |

mahānubhāvo dhaureyo 'nanyaneyo mahānayaḥ || 49 ||

vāgīśo vākpatir vāgmī vācaspatir anantagīḥ |

satyavāk satyavādī ca catuḥsatyopadeśakaḥ || 50 ||

avaivartiko hy anāgāmī khaḍgaḥ pratyekanāyakaḥ |

nānāniryāṇaniryāto mahābhūtaikakāraṇaḥ || 51||

arhan kṣīṇāsravo bhikṣur vītarāgo jitendriyaḥ |

kṣemaprāpto 'bhayaprāptaḥ śītībhūto hy anāvilaḥ || 52 ||

vidyācaraṇasaṁpannaḥ sugato lokavit paraḥ |

nirmamo nirahaṁkāraḥ satyadvayanayasthitaḥ || 53 ||

saṁsārapārakoṭisthaḥ kṛtakṛtyaḥ sthale sthitaḥ |

kaivalyajñānaniṣṭhyūtaḥ prajñāśastro vidāraṇaḥ || 54 ||

saddharmo dharmarāḍ bhāsvān lokālokakaraḥ paraḥ |

dharmeśvaro dharmarājaḥ śreyomārgopadeśakaḥ || 55 ||

siddhārthaḥ siddhasaṅkalpaḥ sarvasaṅkalpavarjitaḥ |

nirvikalpo 'kṣayo dhātur dharmadhātuḥ paro 'vyayaḥ || 56 ||

puṇyavān puṇyasaṁbhāro jñānaṁ jñānākaraṁ mahat |

jñānavān sadasajjñānī saṁbhāradvayasaṁbhṛtaḥ || 57 ||

śāśvato viśvarāḍ yogī dhyānaṁ dhyeyo dhiyāṁ patiḥ |

pratyātmavedyo hy acalaḥ paramādyas trikāyadhṛk || 58 ||

pañcakāyātmako buddhaḥ pañcajñānātmako vibhuḥ |
pañcabuddhātmamukuṭaḥ pañcacakṣur asaṅgadhṛk || 59 ||
janakaḥ sarvabuddhānāṁ buddhaputraḥ paro varaḥ |
prajñābhavodbhavo yonir dharmayonir bhavāntakṛt || 60 ||
ghanaikasāro vajrātmā sadyojāto jagatpatiḥ |
gaganodbhavaḥ svayambhūḥ prajñājñānānalo mahān || 61 ||
vairocano mahādīptir jñānajyotir virocanaḥ |
jagatpradīpo jñānolko mahātejāḥ prabhāsvaraḥ || 62 ||
vidyārājo 'gramantreśo mantrarājo mahārthakṛt |
mahoṣṇīṣo 'dbhutoṣṇīṣo viśvadarśī viyatpatiḥ || 63 ||
sarvabuddhātmabhāvāgryo jagadānandalocanaḥ |
viśvarūpī vidhātā ca pūjyo mānyo mahāṛṣiḥ || 64 ||
kulatrayadharo mantrī mahāsamayamantradhṛk |
ratnatrayadharaḥ śreṣṭhas triyānottamadeśakaḥ || 65 ||
amoghapāśo vijayī vajrapāśo mahāgrahaḥ |
vajrāṅkuśo mahāpāśo vajrabhairavabhīkaraḥ || 66 ||
krodharāṭ ṣaṇmukho bhīmaḥ ṣaṇnetraḥ ṣaḍbhujo balī |
daṁṣṭrākarālaḥ kaṅkālo halāhalaḥ śatānanaḥ || 67 ||
yamāntako vighnarājo vajravego bhayaṅkaraḥ |
vighuṣṭavajro hṛdvajro māyāvajro mahodaraḥ || 68 ||
kuliśeśo vajrayonir vajramaṇḍo nabhopamaḥ |
acalaikajaṭāṭopo gajacarmapaṭārdradhṛk || 69 ||
hāhākāro mahāghoro hīhīkāro bhayānakaḥ |
aṭṭahāso mahāhāso vajrahāso mahāravaḥ || 70 ||

vajrasattvo mahāsattvo vajrarājo mahāsukhaḥ |

vajracaṇḍo mahāmodo vajrahūṁkārahūṁkṛtiḥ || 71 ||

vajrabāṇāyudhadharo vajrakhaḍgo nikṛntanaḥ |

viśvavajradharo vajrī ekavajrī raṇañjahaḥ || 72 ||

vajrajvālākarālākṣo vajrajvālāśiroruhaḥ |

vajrāveśo mahāveśaḥ śatākṣo vajralocanaḥ || 73 ||

vajraromāṅkuratanur vajraromaikavigrahaḥ |

vajrakoṭinakhārambho vajrasāraghanacchaviḥ || 74 ||

vajramālādharaḥ śrīmān vajrābharaṇabhūṣitaḥ |

hāhāṭṭahāso nirghoṣo vajraghoṣaḥ ṣaḍakṣaraḥ || 75 ||

mañjughoṣo mahānādas trailokyaikaravo mahān |

ākāśadhātuparyantaghoṣo ghoṣavatāṁ varaḥ || 76 ||

tathatābhūtanairātmyabhūtakoṭir anakṣaraḥ |

śūnyatāvādivṛṣabho gambhīrodāragarjanaḥ || 77 ||

dharmaśaṅkho mahāśabdo dharmagaṇḍī mahāraṇaḥ |

apratiṣṭhitanirvāṇo daśadigdharmadundubhiḥ || 78 ||

arūpo rūpavān agryo nānārūpo manomayaḥ |

sarvarūpāvabhāsaśrīr aśeṣapratibimbadhṛk || 79 ||

apradhṛṣyo maheśākhyas traidhātukamaheśvaraḥ |

samucchritāryamārgastho dharmaketur mahodayaḥ || 80 ||

trailokyaikakumārāṅgaḥ sthaviro vṛddhaḥ prajāpatiḥ |

dvātriṁśallakṣaṇadharaḥ kāntas trailokyasundaraḥ || 81 ||

lokajñānaguṇācāryo lokācāryo viśāradaḥ |

nāthas trātā trilokāptaḥ śaraṇaṁ tāyy anuttaraḥ || 82 ||

gaganābhogasaṁbhogaḥ sarvajñajñānasāgaraḥ |

avidyāṇḍakośasaṁbhettā bhavapañjaradāraṇaḥ || 83 ||

śamitāśeṣasaṁkleśaḥ saṁsārārṇavapāragaḥ |

jñānābhiṣekamukuṭaḥ samyaksaṁbuddhabhūṣaṇaḥ || 84 ||

triduḥkhaduḥkhaśamanas tryanto 'nantas trimuktigaḥ |

sarvāvaraṇanirmukta ākāśasamatāṁ gataḥ || 85 ||

sarvakleśamalātītas tryadhvānadhvagatiṁ gataḥ |

sarvasattvamahānāgo guṇaśekharaśekharaḥ || 86 ||

sarvopadhivinirmukto vyomavartmani susthitaḥ |

mahācintāmaṇidharaḥ sarvaratnottamo vibhuḥ || 87 ||

mahākalpataruḥ sphīto mahābhadraghaṭottamaḥ |

sarvasattvārthakṛt kartā hitaiṣī sattvavatsalaḥ || 88 ||

śubhāśubhajñaḥ kālajñaḥ samayajñaḥ samayī vibhuḥ |

sattvendriyajño velajño vimuktitrayakovidaḥ || 89 ||

guṇī guṇajño dharmajñaḥ praśasto maṅgalodayaḥ |

sarvamaṅgalamāṅgalyaḥ kīrtir lakṣmīr yaśaḥ śubhaḥ || 90 ||

mahotsavo mahāśvāso mahānando mahāratiḥ |

satkāraḥ satkṛtir bhūtiḥ pramodaḥ śrīr yaśaspatiḥ || 91 ||

vareṇyo varadaḥ śreṣṭhaḥ śaraṇyaḥ śaraṇottamaḥ |

mahābhayāriḥ pravaro niḥśeṣabhayanāśanaḥ || 92 ||

śikhī śikhaṇḍī jaṭilo jaṭī mauṇḍī kirīṭimān |

pañcānanaḥ pañcaśikhaḥ pañcacīrakaśekharaḥ || 93 ||

mahāvratadharo mauñjī brahmacārī vratottamaḥ |

mahātapās taponiṣṭhaḥ snātako gautamo 'graṇīḥ || 94 ||

brahmavid brāhmaṇo brahmā brahmanirvāṇam āptavān |

muktir mokṣo vimokṣāṅgo vimuktiḥ śāntatā śivaḥ || 95 ||

nirvāṇaṁ nirvr̥tiḥ śāntiḥ śreyo niryāṇam antagaḥ |

sukhaduḥkhāntakr̥n niṣṭhā vairāgyam upadhikṣayaḥ || 96 ||

ajayo 'nupamo 'vyakto nirābhāso nirañjanaḥ |

niṣkalaḥ sarvago vyāpī sūkṣmo ’bījam anāsravaḥ || 97 ||

arajo virajo vimalo vāntadoṣo nirāmayaḥ |

suprabuddho vibuddhātmā sarvajñaḥ sarvavit paraḥ || 98 ||

vijñānadharmatātīto jñānam advayarūpadhr̥k |

nirvikalpo nirābhogas tryadhvasaṁbuddhakāryakr̥t || 99 ||

anādinidhano buddha ādibuddho niranvayaḥ |

jñānaikacakṣur amalo jñānamūrtis tathāgataḥ || 100 ||

vāgīśvaro mahāvādī vādirāḍ vādipuṅgavaḥ |

vadatāṁ varo variṣṭho vādisiṁho 'parājitaḥ || 101 ||

samantadarśī prāmodyas tejomālī sudarśanaḥ |

śrīvatsaḥ suprabho dīptir bhābhāsurakaradyutiḥ || 102 ||

mahābhiṣagvaraḥ śreṣṭhaḥ śalyahartā niruttaraḥ |

aśeṣabhaiṣajyataruḥ kleśavyādhimahāripuḥ || 103 ||

trailokyatilakaḥ kāntaḥ śrīmān nakṣatramaṇḍalaḥ |

daśadigvyomaparyanto dharmadhvajamahocchrayaḥ || 104 ||

jagacchatraikavipulo maitrīkaruṇamaṇḍalaḥ |

padmanarteśvaraḥ śrīmān ratnacchatro mahāvibhuḥ || 105 ||

sarvabuddhamahārājaḥ sarvabuddhātmabhāvadhr̥k |

sarvabuddhamahāyogaḥ sarvabuddhaikaśāsanaḥ || 106 ||

vajraratnābhiṣekaśrīḥ sarvaratnādhipeśvaraḥ |

sarvalokeśvarapatiḥ sarvavajradharādhipaḥ || 107 ||

sarvabuddhamahācittaḥ sarvabuddhamanogatiḥ |

sarvabuddhamahākāyaḥ sarvabuddhasarasvatī || 108 ||

vajrasūryamahāloko vajrenduvimalaprabhaḥ |

virāgādimahārāgo viśvavarṇojjvalaprabhaḥ || 109 ||

sambuddhavajraparyaṅko buddhasaṁgītidharmadhṛk |

buddhapadmodbhavaḥ śrīmān sarvajñajñānakoṣadhṛk || 110 ||

viśvamāyādharo rājā buddhavidyādharo mahān |

vajratīkṣṇo mahākhaḍgo viśuddhaḥ paramākṣaraḥ || 111 ||

duḥkhacchedamahāyāno vajradharmamahāyudhaḥ |

jinajig vajragāmbhīryo vajrabuddhir yathārthavit || 112 ||

sarvapāramitāpūrī sarvabhūmivibhūṣaṇaḥ |

viśuddhadharmanairātmyaḥ samyagjñānenduhṛtprabhaḥ || 113 ||

māyājālamahodyogaḥ sarvatantrādhipaḥ paraḥ |

aśeṣavajraparyaṅko niḥśeṣajñānakāyadhṛk || 114 ||

samantabhadraḥ sumatiḥ kṣitigarbho jagaddhṛtiḥ |

sarvabuddhamahāgarbho viśvanirmāṇacakradhṛk || 115 ||

sarvabhāvasvabhāvāgryaḥ sarvabhāvasvabhāvadhṛk |

anutpādadharmā viśvārthaḥ sarvadharmasvabhāvadhṛk || 116 ||

ekakṣaṇamahāprājñaḥ sarvadharmāvabodhadhṛk |

sarvadharmābhisamayo bhūtāntamunir agradhīḥ || 117 ||

stimitaḥ suprasannātmā samyaksaṁbuddhabodhidhṛk |

pratyakṣaḥ sarvabuddhānāṁ jñānārciḥ suprabhāsvaraḥ || 118 ||

iṣṭārthasādhakaḥ paraḥ sarvāpāyaviśodhakaḥ |

sarvasattvottamo nāthaḥ sarvasattvapramocakaḥ || 119 ||

kleśasaṁgrāmaśūraikaḥ ajñānaripudarpahā |

dhīśṛṅgāradharaḥ śrīmān vīrabībhatsarūpadhṛk || 120 ||

bāhudaṇḍaśatākṣepapadanikṣepanarttanaḥ |
śrīmacchatabhujābhogagaganābhoganarttanaḥ || 121 ||

ekapādatalākrāntamahīmaṇḍatale sthitaḥ |
brahmāṇḍaśikharākrāntapādāṅguṣṭhanakhe sthitaḥ || 122 ||

ekārtho 'dvayadharmārthaḥ paramārtho 'vinaśvaraḥ |

nānāvijñaptirūpārthaś cittavijñānasantatiḥ || 123 ||

aśeṣabhāvārtharatiḥ śūnyatāratir agradhīḥ |

bhavarāgādyatītaś ca bhavatrayamahāratiḥ || 124 ||

śuddhaśubhrābhradhavalaḥ śaraccandrāṁśusuprabhaḥ |

bālārkamaṇḍalacchāyo mahārāganakhaprabhaḥ || 125 ||

indranīlāgrasaccīro mahānīlakacāgradhṛk |

mahāmaṇimayūkhaśrīr buddhanirmāṇabhūṣaṇaḥ || 126 ||

lokadhātuśatākampī ṛddhipādamahākramaḥ |

mahāsmṛtidharas tattvaś catuḥsmṛtisamādhirāṭ || 127 ||

bodhyaṅgakusumāmodas tathāgataguṇodadhiḥ |

aṣṭāṅgamārganayavit samyaksaṁbuddhamārgavit || 128 ||

sarvasattvamahāsaṅgo niḥsaṅgo gaganopamaḥ |

sarvasattvamanojātaḥ sarvasattvamanojavaḥ || 129 ||

sarvasattvendriyārthajñaḥ sarvasattvamanoharaḥ |

pañcaskandhārthatattvajñaḥ pañcaskandhaviśuddhadhṛk || 130 ||

sarvaniryāṇakoṭisthaḥ sarvaniryāṇakovidaḥ |

sarvaniryāṇamārgasthaḥ sarvaniryāṇadeśakaḥ || 131 ||

dvādaśāṅgabhavotkhāto dvādaśākāraśuddhadhṛk |

catuḥsatyanayākāraḥ aṣṭajñānāvabodhadhṛk || 132 ||

dvādaśākārasatyārthaḥ ṣoḍaśākāratattvavit |

viṁśatyākārasaṁbodhir vibuddhaḥ sarvavit paraḥ || 133 ||

ameyabuddhanirmāṇakāyakoṭivibhāvakaḥ |

sarvakṣaṇābhisamayaḥ sarvacittakṣaṇārthavit || 134 ||

nānāyānanayopāyajagadarthavibhāvakaḥ |

yānatritayaniryāta ekayānaphale sthitaḥ || 135 ||

kleśadhātuviśuddhātmā karmadhātukṣayaṅkaraḥ |

oghodadhisamuttīrṇo yogakāntāraniḥsṛtaḥ || 136 ||

kleśopakleśasaṁkleśasuprahīṇasavāsanaḥ |

prajñopāyamahākaruṇā-amoghajagadarthakṛt || 137 ||

sarvasaṁjñāprahīṇārtho vijñānārtho nirodhadhṛk |

sarvasattvamanoviṣayaḥ sarvasattvamanogatiḥ || 138 ||

sarvasattvamanontasthas taccittasamatāṅgataḥ |

sarvasattvamanohlādī sarvasattvamanoratiḥ || 139 ||

siddhānto vibhramāpetaḥ sarvabhrāntivivarjitaḥ |

niḥsandigdhamatis tryarthaḥ sarvārthas triguṇātmakaḥ || 140 ||

pañcaskandhārthas trikālaḥ sarvakṣaṇavibhāvakaḥ |

ekakṣaṇābhisambuddhaḥ sarvabuddhasvabhāvadhṛk || 141 ||

anaṅgakāyaḥ kāyāgryaḥ kāyakoṭivibhāvakaḥ |

aśeṣarūpasaṁdarśī ratnaketur mahāmaṇiḥ || 142 ||

sarvasaṁbuddhaboddhavyo buddhabodhir anuttaraḥ |

anakṣaro mantrayonir mahāmantrakulatrayaḥ || 143 ||

sarvamantrārthajanako mahābindur anakṣaraḥ |

pañcākṣaro mahāśūnyo binduśūnyaḥ śatākṣaraḥ || 144 ||

sarvākāro nirākāraḥ ṣoḍaśārdhārdhabindudhṛk |

akalaḥ kalanātītaś caturthadhyānakoṭidhṛk || 145 ||

sarvadhyānakalābhijñaḥ samādhikulagotravit |

samādhikāyaḥ kāyāgryaḥ sarvasaṁbhogakāyarāṭ || 146 ||

nirmāṇakāyaḥ kāyāgryo buddhanirmāṇavaṁśadhṛk |

daśadigviśvanirmāṇo yathāvajjagadarthakṛt || 147 ||

devātidevo devendraḥ surendro dānavādhipaḥ |

amarendraḥ suraguruḥ pramathaḥ pramatheśvaraḥ || 148 ||

uttīrṇabhavakāntāra ekaḥ śāstā jagadguruḥ |

prakhyātadaśadigloko dharmadānapatir mahān || 149 ||

maitrīsannāhasannaddhaḥ karuṇāvarmavarmitaḥ |

prajñākhaḍgo dhanurbāṇaḥ kleśājñānaraṇaṁjahaḥ || 150 ||

mārārir mārajid vīraś caturmārabhayāntakṛt |

sarvamāracamūjetā saṁbuddho lokanāyakaḥ || 151 ||

vandyaḥ pūjyo 'bhivādyaś ca mānanīyaś ca nityaśaḥ |

arcanīyatamo mānyo namasyaḥ paramo guruḥ || 152 ||

trailokyaikakramagatir vyomaparyantavikramaḥ |

traividyaḥ śrotriyaḥ pūtaḥ ṣaḍabhijñaḥ ṣaḍanusmṛtiḥ || 153 ||

bodhisattvo mahāsattvo lokātīto maharddhikaḥ |

prajñāpāramitāniṣṭhaḥ prajñātattvatvam āgataḥ || 154||

ātmavit paravit sarvaḥ sarvīyo hy agrapudgalaḥ |

sarvopamām atikrānto jñeyo jñānādhipaḥ paraḥ || 155 ||

dharmadānapatiḥ śreṣṭhaś caturmudrārthadeśakaḥ |

paryupāsyatamo jagatāṁ niryāṇatrayayāyinām || 156 ||

paramārthaviśuddhaśrīs trailokyasubhago mahān |

sarvasampatkaraḥ śrīmān mañjuśrīḥ śrīmatāṁ varaḥ || 157 ||

namas te varadavajrāgrya bhūtakoṭe namo 'stu te |

namas te śūnyatāgarbha buddhabodhe namo 'stu te || 158 ||

buddharāga namas te 'stu buddhakāma namo namaḥ |

buddhaprīte namas tubhyaṁ buddhamoda namo namaḥ || 159 ||

buddhasmita namas tubhyaṁ buddhahāsa namo namaḥ |

buddhavāca namas tubhyaṁ buddhabhāva namo namaḥ || 160 ||

abhavodbhava namas tubhyaṁ namas te buddhasaṁbhava |

gaganodbhava namas tubhyaṁ namas te jñānasaṁbhava || 161 ||

māyājāla namas tubhyaṁ namas te buddhanāṭaka |

namas te sarvasarvebhyo jñānakāya namo 'stu te || 162 ||

oṁ sarvadharmābhāvasvabhāvaviśuddhavajra a ā aṁ aḥ |

prakṛtipariśuddhāḥ sarvadharmā yaduta
sarvatathāgatajñānakāyamañjuśrīpariśuddhitām upādāyeti

a āḥ sarvatathāgatahṛdaya hara hara | oṁ hūṁ hrīḥ

bhagavañ jñānamūrtivāgīśvara mahāvāca
sarvadharmagaganāmalasupariśuddhadharmadhātujñānagarbha āḥ |

atha vajradharaḥ śrīmān hṛṣṭatuṣṭaḥ kṛtāñjaliḥ |

praṇamya nāthaṁ saṁbuddhaṁ bhagavantaṁ tathāgatam || 163 ||

anyaiś ca bahubhir nāthair guhyendrair vajrapāṇibhiḥ |

sa sārdhaṁ krodharājānaiḥ provācoccair idaṁ vacaḥ || 164 ||

anumodāmahe nātha sādhu sādhu subhāṣitam |

kr̥to 'smākaṁ mahān arthaḥ samyaksaṁbodhiprāpakaḥ || 165 ||

jagataś cāpy anāthasya vimuktiphalakāṅkṣiṇaḥ |

śreyomārgo viśuddho 'yaṁ māyājālanayoditaḥ || 166 ||

gambhīrodāravaipulyo mahārtho jagadarthakr̥t |

buddhānāṁ viṣayo hy eṣa samyaksaṁbuddhabhāṣitaḥ || 167 ||

ity āryamāyājālāt ṣoḍaśasāhasrikān mahāyogatantrāntaḥpātisamādhijālapaṭalād bhagavattathāgataśākyamunibhāṣitā bhagavato mañjuśrījñānasattvasya paramārthā nāmasaṁgītiḥ parisamāptā ||

**Notes to the text**

As a general principle:

Verses 1-42 are according to Anthony Tribe's edition (2016).

The remaining verses are according to the edition by Banarsi Lal (1994).

The following are exceptions to the above:

Verse 5: -karaiḥ (Tribe), but other editions also apply the sandhi.

Verse 15: -hānaya iti (Tribe), I here followed Lal (the commentaries do not seem to support Tribe's choice of a hypermetrical verse, in my understanding).

Verse 16: prahvakāyasthito (Tribe); I thank Harunaga Isaacson for pointing out that prahvakāyaḥ sthito is more natural, and supported by both Vilāsavajra's commentary, and the Amr̥takaṇikā.

Verse 23: mahad (Tribe), possibly a typographical error. See Lal's edition.

Verse 27: Tribe divides the mantra words, but I think they should be read together, in compound (and I believe this is supported by the commentarial explanation).

Verse 28: tad yathā (Tribe), but I prefer the convention of writing tadyathā as one unit.

Verse 32: nisūdanaḥ (Tribe), I prefer the orthography niṣūdana (adopted by Lal).

Verse 82: tāyī niruttaraḥ (Lal); but anuttaraḥ is given as the reading of Ka and Kha; Pandey adopts anuttaraḥ, and I think it preferable for metrical reasons.

Verse 85: Lal has (śa) between brackets and ga as the reading; however, śa is what other editors seem to prefer and, importantly, is supported by the Tibetan zhi.
Verse 96: antakaḥ (Lal); but antagaḥ is reported as the reading of Ka and Kha and Ṅa, and the Tibetan ñe supports antagaḥ (or perhaps even, antikaḥ?), rather than antakaḥ. Furthermore, I think that the Amr̥takaṇikā comments on this verse make better sense if we assume that the author read antagaḥ.

Verse 97: note that the Tibetan sa bon bral means that ’bījam is understood as the result of sandhi and thus equal to abījam; the Amr̥takaṇikā, on the other hand, understands this as sūkṣmaḥ + bījam. In Sanskrit this distinction would not exist while pronouncing the text, and actually even according to some conventions both possibilities would be allowed in writing.

Verse 103: kleśavyādhir (Lal); but the Amr̥takaṇikā seems to read it in compound, and the Tibetan appears to corroborate this (or, it could be translating kleśavyādher).

Verse 105: -nr̥tyeśvaraḥ (Lal): but the Amr̥takaṇikā has narteśvara, and this expression is attested elsewhere.

Verse 113: the Amr̥takaṇikā, in my understanding, may be reading nairātmya- in compound; Davidson choice of nairātmyaṁ may thus be less convincing, although certainly possible.

Verse 126: -nirvāṇabhūṣaṇaḥ (Lal): but the Tibetan sprul pa clearly represents nirmāṇa. I thank Harunaga Isaacson for pointing out that the Amr̥takaṇikā also supports reading nirmāṇa rather than nirvāṇa (by glossing the expression with sarvadharmasukhamayabuddharūpatāspharaṇaṁ).

Verse 144: ṣaḍakṣaraḥ (Lal); the Amr̥takaṇikā commentary also reads ṣaḍakṣaraḥ; the Tibetan, on the other hand, has brgya, and Lal reports śatākṣara as the reading of Kha and Cha. Since I mean to offer a version closer to the short Tibetan version, I have opted for śatākṣaraḥ.

## References

Davidson, Ronald M. (1981), ed. and tr. "The Litany of Names of Manjusri. Text and Translation of the Manjusrinamasamgiti", in: Tantric and Taoist Studies in Honour of R. A. Stein, Mélanges Chinois et Bouddhique, vol. XX, (Brüssel 1981), pp. 1-69.

Lal, Banarsi (1994), ed. *Āryamañjuśrīnāmasaṁgīti with Amr̥takaṇikā-ṭippaṇī by Bhikṣu Raviśrījñāna and Amr̥takaṇikodyota-nibandha of Vibhūticandra*. CIHTS: Sarnath.

Pandey, J.S. (1994), ed. *Bauddhastotrasamgraha*. Sarnath.

Tribe, (2016). *Tantric Buddhist Practice in India. Vilāsavajra's commentary on the Mañjuśrī-nāmasaṁgīti*. Routledge: Oxford and New York.